अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
तृणादिस्तेयम्। आदिना काष्ठद्रुमचेलचर्म्मामिषेक्षुतक्रमूलपुष्पवेदलसूत्रगन्धानां ग्रहणम्। वेदलं वेणुघटितभाण्डम्। गन्धः कस्तूर्य्यादिः। अत्रापवादः। अस्तेयमग्नये काष्ठमस्तेयञ्च तृणं गवे।	त्रिरात्रोपवासः। तृणादीनां हरणे मासैकव्रतम्। मासार्द्धव्रतञ्च। शङ्खमुनिना यदुक्तं तत् कालदेशापहर्त्तृस्वामीगुणदौर्गत्याभ्यासानभ्यासकामाकामापेक्षया उत्कृष्टापकृष्टद्रव्यापहारे च वेदितव्यम्।	•	१॥०कार्षापणः।	यथाशक्ति।
जीविकाहरणम्।	दस्य यस्य वर्णस्य वृत्तिच्छेदः तत्तद्वर्णवधोक्तं प्रायश्चित्तं कर्त्तव्यम्।			
	अल्पहरणापहारे चान्द्रायणम्। अत्र चोत्तमाधमत्वे प्रयोजकादिकं सकृदभ्यासी ज्ञानाज्ञाने च संवीक्ष्य वधोक्तपादार्द्धादिव्यवस्थोहनीया।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
देवद्विजद्रव्यापहरणम्।	संवत्सरमप्सु मज्जनं अघमर्षणावर्त्तनञ्च। यच्चात्र गुरुप्रायश्चित्तं मन्वन्तरोक्तं तदत्यन्ताभ्यास उत्तमसम्बन्धादपेक्षया समूह्यम्। इति स्तेयप्रायश्चित्तम्॥*॥			
अथ अगम्यागमनम्। तत्र सवर्णासु अस्वजनस्त्रीगमनम्। तत्र ब्राह्मणस्य श्रोत्रियभार्य्यागमनम्।	सकृद्गमने त्रैवार्षिकव्रतम्। द्वितीये षाड्वार्षिकं तृतीये नववार्षिकं चतुर्थे संपूर्णं द्वादशवार्षिकम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	अश्रोत्रियनिर्गुणभार्य्यागमने द्वैवार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	३० धेनवः।	९०कार्षापणाः।	१७ गावः। अशक्तौ १६॥/१३ कार्षापणाः।
क्षत्रियस्य क्षत्रियभार्य्यागमनम्।	द्वैवार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्। अभ्यासे द्वैगुण्यादिकम्।	३० धेनवः।	९०कार्षापणाः।	१७ गावः। अशक्तौ १६॥/१३ कार्षापणाः।
वैश्यस्य वैश्यभार्य्यागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। अशक्तौ ८/७ कार्षापणाः।
शूद्रस्य पञ्चयज्ञानुष्ठायिन्यायवृत्तशूद्रभार्य्यागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। अशक्तौ ८/७ कार्षापणाः।
शूद्रस्यान्यशूद्रागमनम्।	षाण्मासिक व्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४/१२॥ कार्षापणाः।
ब्राह्मणस्य क्षत्रियागमनम्।	सार्द्धवार्षिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	२३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणस्य वैश्यागमनं विशिष्टशूद्रागमनञ्च।	षाण्मासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४/१२॥ कार्षापणाः।
ब्राह्मणस्याधमशूद्रागमनम्।	सार्द्धमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	२ धेनू।	५॥/० कार्षापणाः।	१ गौः। अशक्तौ १ कार्षापणः।
क्षत्रियस्य वैश्यभार्य्यागमनं सच्छूद्रागमनञ्च।	नवमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	१२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
क्षत्रियस्याधमशूद्रागमनम्।	त्रैमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	४ धेनवः।	११।० कार्षापणाः।	२ गावौ। अशक्तौ २ कार्षापणौ।
वैश्यस्य सच्छूद्रागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५कार्षापणाः।	९ गावः। अशक्तौ ८/७ कार्षापणाः।
वैश्यस्याधमशूद्रागमनम्।	सार्द्धचातुर्मासिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	६ धेनवः।	१६॥/० कार्षापणाः।	३ गावः। अशक्तौ ३/१ कार्षापणाः।
अथ प्रतिलोमस्त्रीगमनम्। तत्र शूद्रस्याज्ञानतो ब्राह्मणीगमनम्।	द्वादशवार्षिकव्रतम्। ज्ञानात् गुर्व्वङ्गनागमनोक्तप्रकारेणमरणम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।